**दुरारुह** पु० दुःखेनारुह्यतेऽसौ दुर्+आ—रुह—बाहुलकात् कर्मणि क । १बिल्वे २नारिकेलवृक्षे च । ३खर्ज्जूर्यां स्त्री राजनि० । ४दुरारोहणीये त्रि० "सुपुष्पितः स्यादफलः फलवान् स्याद्दुरारुहः" भा०आ० १४०अ०

**दुरारोह** पुंस्त्री० दुःखेनारुह्यते दुर्+आ+रुह—खल् । १सरटे स्त्रियां जातित्वात् ङीप् । २श्रीवल्ल्यां स्त्री राजनि० ३शाल्मलिवृक्षे स्त्री त्रिका० । ४दुरारोहणीये त्रि० । "दुरारोहं पदं राज्ञां सर्वलोकनमस्कृतम्" कामन्द० भावे खल् । ५दुःखेनारोहणे पु० ।

**दुरालभा**(म्भा) स्त्री दुःखेनालभ्यते स्पृश्यते असौ दुर्+आ+लभ—खल् आगमविधेरनित्यत्वात् वा नुम् । (आलकुशी) १लतायाम् राजनि० । "दुरालभा कटुस्तिक्ता चातिरोष्णा मधुराम्लिका । वातगुल्मप्रमेहाणां नाशिनी परिकीर्तिता" राजनि० । "यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा" भावप्र० २दुःस्पर्शनीयमात्रे त्रि० । "चूर्णं श्यामा त्रिवृन्नीली कटी सुस्ता दुरालभा" सुश्रु० "तीक्ष्णवीर्यास्तु भूतानां दुरालम्भाः सकण्टकाः" भा०अनु० ६८अ० । [कल्पतरुः ।

**दुरालाप** पु० दुष्ट आलापः प्रा०स० । गालिवचने शब्दार्थ-

**दुराव्य** न०अव—गत्यादौ भावे ण्यत् दुष्टमाव्यं मतिः प्रा०स० । दुष्टमतौ "सुविततस्य सनामहेऽतिसेतुं दुराव्यम्" ऋ० ६।४१।२ "दुराव्यं दुष्टमतिम्" भा० ।

**दुराशय** पु०प्रा०स० । १दुष्टे आशये "स्फुटनिर्भिन्नदुराशयोऽधमः" माघः । दुष्ट आशयो यस्य प्रादि०ब० । २दुष्टाशययुक्ते त्रि० "उपेयिवान् मूलमशेषमूलं दुराशयः कामदुघाङ्घ्रिपस्य" भाग० ३।२१।१५

**दुराशा** स्त्री प्रा०स० । दुष्पूरायामाशायाम् ।

**दुरासद** त्रि० दुःखेनासद्यतेऽसौ दुर्+आ+सद—कर्मणि खल् । १दुष्प्राप्ये २दुर्गम्ये "त्रिलोचनैकांशतया दुरासदः" "स बभूव दुरासदः परैः" रघुः । "स्मयमानमपि यद्दुरासदम्" माघः । "पापाटव्या दुरासदाया दवतः" नलोदयः ।

**दुरित** न० दुष्टमितं गमनं नरकादिस्थानप्राप्तिरस्मात् । १पापे २तद्वति त्रि० अमरः । "दुरितैरपि कर्त्तुमात्मसात् प्रयतन्ते नृपसूनवो हि यत्" रघुः "महानदीप्रवाहमिव सर्वदुरिततापहरम्" काद० "कामीवार्द्रीपराधः स दहतु दुरितं शाम्भवोवः शराग्निः" अमरु०

**दुरितदमनी** स्त्री दुरितं दम्यतेऽनया दम—करणे ल्युट् ङीप् । १शमीवृक्षे राजनि० २पापदमनसाधनमात्रे त्रि० स्त्रियां ङीप् ।

**दुरितारि** ६त० । १दुरितनाशके । २जैनानां शासनदेवताभेदे च । "चक्रेश्वर्यजिता बाला दुरितारिश्च कालिका । महाकाली श्यामा शान्ता भ्रुकुटिश्च सुतारका । अशोका मानवी चण्डा विदिता चाङ्कुशी तथा । कन्दर्पनिर्वाणबला धारिणी धरणप्रिया । नरदत्ताऽथ गान्धार्यम्बिका पद्मावती तथा । सिद्धायिका चेति जैन्यः क्रमाच्छासनदेवताः" हेमच० ।

**दुरिष्ट** न० दुष्टमिष्टं यज्ञः । अभिचारार्थे यज्ञे । "देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः । स याति क्रमिभक्ष्ये वै क्रमीशे च दुरिष्टकृदिति" विष्णुपु०

**दुरिष्टि** स्त्री दुष्टा इष्टिः प्रा०स० । अशास्त्रीये यागे "पाहि दुरिष्ट्यै" यजु०२।२० । पञ्चम्यर्थे चतुर्थी ।

**दुरीश** पु० दुष्ट ईशः प्रा०स० । निन्दिते प्रभौ

**दुरीषणा** स्त्री दुष्टा ईषणा प्रा०स० । शापे शब्दार्थकल्पतरुः ।

**दुरु** पु० पर्वतभेदे । "शृङ्गवान् मन्दरो नीलो निषधोदुरुदुर्दुरस्तथा" भा०अनु०१६५अ० । दर्दुरस्तथेत्येव पाठः साधुः ।

**दुरुक्त** न० दुष्टमुक्तं प्रा०स० । दुष्टवचने "दुरुक्तभाषाभिहितैः प्राप्नुवन्ति सुदुष्कृतम्" भा०अनु०५०२श्लो० ।

**दुरुच्छेद** त्रि० दुःखेन उच्छिद्यतेऽसौ दु+उद्+छिद—कर्मणि खल् । १दुर्वारे भावे खल् । २दुःखेन वारणे पु० ।

**दुरुत्तर** त्रि० दुःखेनोत्तीर्यतेऽसौ दुर्+उद्+तॄ—कर्म्मणि खल् । १दुस्तरे "दुरुत्तरे पङ्क इवान्धकारे" भट्टिः । भावे खल् । २दुःखेन तरणे पु० । दुष्टमुत्तरम् प्रा० स० । ४दुष्टे उत्तरवाक्ये न० ।

**दुरुदाहर** त्रि० दुःखेनोदाह्रियते दुर्+आ—हृ—कर्म्मणि खल् । दुःखेन वचनीये "अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः" माघः । प्रा०स० । २दुष्टे उदाहरणे पु०

**दुरुधुरा** स्त्री जन्मकाले चन्द्रात् द्वितीयद्वादशस्थिते रवि भिन्नग्रहरूपे चान्द्रयोगभेदे तत्स्वरूपभेदफलादिकं वृहज्जा० भट्टोत्पलव्याख्यानयोर्दर्शितं यथा "हित्वार्कं सुनफाऽनफादुरुधुराः स्वान्त्योभयस्थैर्ग्रहैः शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्वसौ । केन्द्रे शीतकरेऽथ वा ग्रहयुते केमद्रुमो नेष्यते । केचित् केन्द्रनवांशकेषु च वदन्त्युक्तिः प्रसिद्धा न सा । त्रिंशत्सरूपाः सुनफाऽनफाख्याः षष्टित्रयं दौरुधुरे प्रभेदाः । इच्छाविकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यनीतिः" वृहज्जा० "अथ सुनफानफादुरुधुराकेमद्रुमाख्यं योगचतुष्टयं